# Buddhastavah

# बुद्धस्तवः

## Document Information

Text title : buddhastavaH

File name : buddhastavaH.itx

Category : vishhnu, dashAvatAra, vishnu, stava

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# बुद्धस्तवः

षड्चक्रे क्रमभावनापरिगतं हृत्पद्ममध्यस्थितं
सम्पश्यच्छिवरूपिणं लयवशादात्मानमध्याश्रितः ।
युष्माकं मधुसूदनो बुधवपुर्धारी स भूयान्मुदे
यस्तिष्ठेत्कमलासने कृतरुचिर्बुद्धैकलिङ्गाकृतिः ॥ १॥

रेतोरक्तमयान्यमूनि भविनां विण्मूत्रपूर्णोदरा-
ण्यालोक्येव कलेवराणि विगलत्तोयार्द्ररन्ध्राणि यः ।
मायाजालनियन्त्रितानि घृणया नोन्मीलयत्यक्षिणी
निर्व्याजप्रणिधाननिश्चलमतिर्बुद्ध्यै स बुद्धोऽस्तु वः ॥ २॥

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
शश्वन्मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः ॥ ३॥

आबाहूद्धतमण्डलाग्ररुचयः सन्नद्धवक्षःस्थलाः
सोष्माणो व्रणिनो विपक्षहृदयप्रोन्माथिनः कर्कशाः ।
उत्सृष्टाम्बरदृष्टिविभ्रमभरा यस्य स्मराग्रेसरा
योधा वारवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥ ४॥

बद्ध्वा पद्मासनं यो नयनयुगमिदं न्यस्य नासाग्रदेशे
धृत्वा मूर्तौ च शान्तौ समरसमिलितौ चन्द्रसूर्याख्यवातौ ।
पश्यन्नन्तर्विशुद्धं किमपि च परमं ज्योतिराकारहीनं
सौख्याम्भोधौ निमग्नः स दिशतु भवतां ज्ञानबोधं बुधोऽयम् ॥ ५॥

कामेनाकृष्य चापं हतपटुपटहं वल्गुभिर्मारवीयैः
भ्रूभङ्गोत्क्षेपजृम्भास्मितललितदृशा दिव्यनारीजनेन ।
सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद्वासवेन
ध्यायन्यो योगपीठादचलित इति वः पातु दृष्टो मुनीन्द्रः ॥ ६॥

किं स्याद्भास्वान्न भानोरमृतघनरसस्यन्दनः सन्ति पादाः
किं वा राकाशशाङ्को न हि तुहिनरुचिः कुत्रचिन्निष्कलङ्कः ।
साक्षाच्चिन्तामणिः किं विपुलफलमणेः सौकुमार्यं कुतस्त्यं
सन्देहान्मुग्धधीभिः प्रथममिति मुनेः पातु दृष्टं वपुर्वः ॥ ७॥

इति बुद्धस्तवः सम्पूर्णः ।

Proofread by PSA Easwaran

---

*Buddhastavah*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*